# Brahmanan Proktam Shivalingadanopadesham

# બ્રાહ્મણાન્ પ્રોક્તં શિવલિઙ્ગદાનોપદેશમ્

## Document Information

Text title : Brahmanan Proktam Shivalingadanopadesham

File name : brAhmaNAnproktaMshivalingadAnopadesham.itx

Category : shiva, shivarahasya, upadesha, advice

Location : doc_shiva

Proofread by : Ruma Dewan

Description/comments : shrIshivarahasyam | ugrAkhyaH saptamAMshaH | adhyAyaH 29 shivagaurIsaMvAde kAshIprabhAvakathanam | 715-727.1||

Latest update : June 16, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanskript**.

June 16, 2024

*sanskritdocuments.org*

# બ્રાહ્મણાન્ પ્રોક્તં શિવલિઙ્ગદાનોપદેશમ્

(શિવરહસ્યાન્તર્ગતે ઉગ્રાખ્યે)

રાજોવાચ

ધનમસ્તિ યથેષ્ટં મે મમ દિત્સાપિ જાયતે ।
કથં દ્રવ્યવ્યયઃ કાર્યો દાનપાત્રં ચ કીદૃશમ્ ॥ ૭૧૫॥

ઇતિ તદ્વચનં શ્રુત્વા ધર્મજ્ઞા વીતમત્સરાઃ ।
ધર્મતત્વં વિચાર્યાદ્રવ્યલોભપરાઙ્મુખાઃ ॥ ૭૧૬॥

બ્રાહ્મણા ઊચુઃ

બહૂનિ સન્તિ દાનાનિ તેષુ સર્વેષુ ચોત્તમમ્ ।
લિઙ્ગદાનં પરં દાનં તત્તુ સર્વાર્થસાધકમ્ ॥ ૭૧૭॥

લિઙ્ગદાનેન ભગવાન્યથા તુષ્યતિ શઙ્કરઃ ।
તથા નાન્યેન દાનેન તુષ્ટો ભવતિ શઙ્કરઃ ॥ ૭૧૮॥

સર્વકામપ્રદં દાનં લિઙ્ગદાનમિતિ શ્રુતમ્ ।
લિઙ્ગદાનં તતઃ કાર્યં વિધિવદ્યત્નપૂર્વકમ્ ॥ ૭૧૯॥

તુલાદાનાદિદાનાનિ સર્વાણ્યપિ નરાધિપ ।
શિવલિઙ્ગપ્રદાનસ્ય કલાં નાર્હન્તિ ષોડશીમ્ ॥ ૭૨૦॥

પ્રાપ્તવ્યં લિઙ્ગદાનેન ધર્માદ્યર્થચતુષ્ટયમ્ ।
લિઙ્ગદાનસમં દાનમત એવ ન દૃશ્યતે ॥ ૭૨૧॥

સુવર્ણમમિતં શુદ્ધં યસ્ય દાનસ્ય દક્ષિણા ।
તાદૃશં દાનમુત્કૃષ્ટં લિઙ્ગદાનં શ્રુતિશ્રુતમ્ ॥ ૭૨૨॥

શિવલિઙ્ગપ્રદો વંશ્યાન્માતૃતઃ પિતૃતઃ શતમ્ ।
ગૃહીત્વા યાતિ સન્તુષ્ટઃ શ્રીમહાદેવસન્નિધિમ્ ॥ ૭૨૩॥

શૈવેભ્ય એવ દાતવ્યં લિઙ્ગદાનં પ્રયત્નતઃ ।

પુરા દાનરતૈર્ભૂપૈર્લિઙ્ગદાનાનિ કેવલમ્ ॥ ૭૨૪॥

કૃતાનિ બહુધા રાજન્ શિવસન્નિધિકાઙ્ક્ષિભિઃ ।
લિઙ્ગદાનફલં વક્તું બ્રહ્મણાપિ ન શક્યતે ॥ ૭૨૫॥

પરં તુ તત્ફલં વક્તું સમર્થઃ પાર્વતીપતિઃ ।
અતઃ કુરુ નરશ્રેષ્ઠ લિઙ્ગદાનમનુત્તમમ્ ॥ ૭૨૬॥

લિઙ્ગદાનેન સુપ્રીતો ભવિષ્યતિ મહેશ્વરઃ । ૭૨૭.૧

॥ ઇતિ શિવરહસ્યાન્તર્ગતે રાજાપ્રતિ બ્રાહ્મણાન્ પ્રોક્તં શિવલિઙ્ગદાનોપદેશં સમ્પૂર્ણમ્ ॥

- ॥ શ્રીશિવરહસ્યમ્ । ઉગ્રાખ્યઃ સપ્તમાંશઃ । અધ્યાયઃ ૨૯ શિવગૌરીસંવાદે કાશીપ્રભાવકથનમ્ । ૭૧૫-૭૨૭.૧॥

- .. shrIshivarahasyam . ugrAkhyaH saptamAMshaH . adhyAyaH 29 shivagaurIsaMvAde kAshIprabhAvakathanam . 715-727.1..

Notes:
About being asked by the Rājā રાજા, the Brāhamaṇa-s બ્રાહ્મણાઃ deliver Upadeśa ઉપદેશ about the Śivaliṅgadāna શિવલિઙ્ગદાન.

Proofread by Ruma Dewan

*Brahmanan Proktam Shivalingadanopadesham*
pdf was typeset on June 16, 2024

Please send corrections to *sanskrit@cheerful.com*